चतुर्दशः पाठः

१४

# आपत्प्रबन्धम्

( इकारान्तस्त्रीलिङ्गम्, नपुसंकलिङ्गञ्च )



धरण्यां प्रकृत्याः प्रकोपेन अकस्माद् घटना घटते यया घटनया धनहानिः एव न अपितु जनहानिः अपि भवति। अकस्माद् घटितासु भूकम्पः, ज्वालामुखीस्फोटः, जलाप्लावः, अनावृष्टिः, हिमस्खलनम्, करकपातः, अग्निज्वालः, शीताघातः, मेघस्फोटः इत्यादिघटनाः प्राकृतिक आपदारूपेण ज्ञायन्ते।

एताभिः आपदाभिः सर्वेऽपि प्राणिनः प्रभाविताः भवन्ति। एताषां द्वारा पूर्वं महज्जनहानिः धनहानिश्च जाता। यथा –

। तमिलनाडुराज्ये भयङ्करचक्रवातस्य ताण्डवम्।

। तत्रैव कुम्बकोणस्थाने अग्निदाहेन त्रिनवतेः बालानां सक्रन्दनमृत्युः जातः।

। सौराष्ट्रे भुजक्षेत्रे भूकम्पस्य विनाशकारि दृश्यम्।

। उत्तराखण्डराज्ये केदारनाथे जलाप्लावनस्य प्रकोपेन पञ्चसहस्रजनाः कालकवलिताः जाताः।

राजस्थाने अनावृष्ट्या सह वारं वारं प्रतिद्वन्द्वं वयं स्मरामः एव। एताः आपदाः विकासगतिं रुन्धन्ति। एतासाम् आपदानाम् अनुसन्धानस्य अनुमानस्य च अपेक्षया रक्षणोपायाः एव श्रेयस्कराः भवन्ति। वयं मिलित्वा एतान् उपायान् कुर्मः।



१. सर्वे मिलित्वा रक्षणकार्येषु प्रवृत्ता भवेम ।

२. धैर्यसाहसाभ्यां स्वविवेकेन परितः स्थितजनानां रक्षा कर्तव्या ।

३. आहतान् आदौ चिकित्सालयं नयाम ।

४. नवभवनादिनिर्माणकाले भवननिर्माणनियमान् कठोरतया पालयाम

५. विद्यालयेषु महाविद्यालयेषु च आपत्प्रबन्धन-शिक्षाप्रशिक्षणं च अनिवार्यं कर्तव्यम् ।

६. प्रतिग्रामम् आपत्शमनदलं भवेत् ।

७. आपत्प्रबन्धने उत्कृष्टसहयोगकर्तृणाम् उत्साहवर्धनं कर्तव्यम् ।

८. आपदानां भेदाः रक्षणोपायाः च सार्वजनिकस्थलेषु लेखितव्याः ।

९. वयं सर्वेऽपि मिलित्वा ईश्वरं प्रार्थयामः यद् स आपदाप्रकोपाद् अस्मान् रक्षतु ।

१०. सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेद् ।



## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
| --- | --- | --- |
| धरण्याम् | पृथिव्याम् | धरती पर |
| घटते | घटितं भवति | घटित होती है |
| यया | यस्याः कारणेन | जिससे |
| स्फोटः | विस्फोटः | फटना |
| जलाप्लावः | प्लावनम् | बाढ़ |
| अनावृष्टिः | वर्षायाः अभावः | अकाल |
| करकपातः | वर्षोपलपातः | ओला वृष्टि |
| अग्निप्रज्वालः | अग्निदाहः | आग लगना |
| शीताघातः | शीतप्रकोपः | शीतलहर |
| मेघस्फोट | मेघस्य स्फोटनम् | बादल का फटना |
| ज्ञायन्ते | अधिगम्यन्ते | जानी जाती है |
| अभवत् | जातम् | हुई |
| चक्रवातः | झञ्झावातः | तूफान |
| प्रतिद्वन्द्वम् | संघर्षः | मुकाबला |
| रक्षणोपायाः | रक्षायाः उपायाः | रक्षा के उपाय |
| श्रेयस्कराः | प्रशंसनीयाः | प्रशंसनीय |
| मिलित्वा | एकीभूय | मिलकर के |
| परिस्थितः | परितः विद्यमानः | चारो ओर विद्यमान |
| आहतान् | पीडितान् | घायलों का |
| आदौ | आरम्भे | प्रारंभ में |
| भद्राणि | कल्याणानि | हित |

## अभ्यासः

१. **निम्नलिखितपदानाम् उच्चारणं कुरुत -**

जलाप्लावः, हिमस्खलनम्, वर्षोपलपातः, मेघस्फोटः, प्रतिद्वन्द्वम्, अगणयित्वा, रक्षणोपायाः

२. **अधोलिखितानां प्रश्नानाम् उत्तराणि लिखत -**

(क) प्राकृतिकापदया कीदृशी हानिः भवति ?

(ख) अकस्माद् घटितानां घटनानां नामानि लिखत।

(ग) सौराष्ट्रे कस्मिन् क्षेत्रे भूकम्पः जातः ?

(घ) राजस्थाने कया सह प्रतिद्वन्द्वः भवति ?

(ङ) आहतान् आदौ कुत्र नयामः ?

३. **रिक्तस्थानानि पूरयत -**

(क) तमिलनाडुराज्ये भयङ्कर ......................ताण्डवं जातम्। (चक्रवातस्य / भूकम्पस्य)

(ख) उत्तराखण्डे केदारनाथे जलाप्लावनेन ............जनाः मृताः। (५०००/७००० )

(ग) आपदाः विकासगतिं ...........................................। ( वर्धयन्ति / रुन्धन्ति )

(घ) रक्षणोपायाः ............................................भवन्ति। ( श्रेयस्कराः / हानिकराः )

(ङ) आपत्प्रबन्धने उत्कृष्टसहयोगकर्तॄणाम् ..............करणीयम्। (उत्साहदमनम् / उत्साहवर्धनम् )

४. **अधोलिखित पदेषु निर्दिष्टविभक्तिवचने योजयित्वा रूपाणि लिखत -**

| | पदानि | विभक्तिः | वचनम् | रूपम् |
|---|---|---|---|---|
| यथा- | प्रकृतिः | षष्ठी | एकवचनम् | प्रकृत्याः |
| | धनहानिः | षष्ठी | एकवचनम् | ................... |
| | त्रिनवतिः | षष्ठी | एकवचनम् | ................... |
| | वारि | षष्ठी | एकवचनम् | ................... |

५. **कोष्ठके प्रदत्तस्य शब्दस्य निर्दिष्टरूपेण रिक्तस्थानानि पूरयत -**

(क) ..........................सर्वं साध्यं भवति। (मति-तृतीया- एकवचनम्)

(ख) तत्र ..........................समूहः अस्ति। (युवति- षष्ठी- एकवचनम्)

(ग) आचार्यस्य ................महत्वपूर्णाः सन्ति। (उक्ति- प्रथमा- बहुवचनम्)

(घ) ..................................व्यजनम् अस्ति। (छदि- सप्तमी- एकवचनम् )

(ङ) कालिदासस्य सप्त प्रसिद्धाः ................सन्ति । (कृति- प्रथमा- बहुवचन)

## योग्यता-विस्तारः





मानवैः भूमेः यद् दोहनं क्रियते यथा तैलकूपेभ्यः तैलस्य दोहनम्, पर्वतानां खननं कृत्वा यन्त्रैः कर्तयित्वा विस्फोटं च कृत्वा बहुमूल्यप्रस्तराणां प्राप्तिः , अत्यधिकमात्रायां भूमेः दोहनम् इत्यादिकम्।

जलबन्धानां निर्माणं निर्बाधगत्या वृक्षाणां कर्तनं, बहुभूमिकभवनानां निर्माणं वातानुकूलितयन्त्राणां च अधिकप्रयोगः प्राकृतिक-आपदानां प्रमुखानि कारणानि सन्ति । मानवः यदा-यदा प्रकृतेः विरुद्धम् आचरितवान् तदा-तदा तेन विनाशकारिणः परिणामाः प्राप्ताः। अतः प्रकृतेः अनुगुणं जीवनं वर्तमानस्य आवश्यकता अस्ति ।